**दिनाङ्क :- 05.09.2025**

**प्रात: - 06:55**

## अध्यापकैः दिवस

अद्य नव दिल्लां विज्ञानभवने राष्ट्रपति: द्रौपदी मुर्मू: अध्यापकेभ्य: राष्ट्रीयपुरस्कारान् प्रदास्यति। अयं गौरवपूर्णः वार्षिकपुरस्कारः तेषां विशिष्टानां अध्यापकानां समर्पणं निष्ठां च द्योतयति, ये शिक्षायाः गुणवत्तां वर्धितवन्तः, ये च स्वविद्यार्थिनां जीवनं उत्तमतया प्रभावितवन्तः। प्रधानमन्त्री नरेन्द्रमोदी ह्यः अध्यापकैः सह संवादं कृतवान्। तस्मिन्नवसरे मोदी अवदत् - भारतीयसमाजे अध्यापकानां प्रति स्वाभाविकः सम्मानो विद्यते ; ते राष्ट्रनिर्माणे महत्वपूर्णां भूमिकां निर्वहन्ति। प्रधानमन्त्री सर्वेषां राष्ट्रीयाध्यापकपुरस्कारेण सम्मानितानां कृते अभिनन्दनानि वचांसि प्रदत्तवान्। । सः अवदत् यत् अध्यापकाः केवलं वर्तमानं न निर्मान्ति, अपि तु राष्ट्रस्य भविष्यं अपि आकारयन्ति, अतः तेषां भूमिका राष्ट्रसेवायाः परमं रूपं इति मन्यते।

## ओणम महोत्सवः

अद्य सर्वत्र केरलसमुदायेन तिरु ओणम महोत्सवः सोल्लासेन सोत्साहेन आचर्यते। अयं उत्सवः केरलस्य महत्वपूर्णेषु उत्सवेषु भवति। गतदिनेभ्यः राज्यं समग्रं उत्सवभावेन रम्यं जातम्। ओणम धर्मिष्ठस्य महाबलिमहाराजस्य पुनरागमनस्मरणरूपेण आचर्यते, यः न्यायप्रियः दयालुः अतीव प्रियः च आसीत्। समग्रे केरलराज्ये शासकीयसंस्थाः, सांस्कृतिकसङ्घटनानि, स्थानीयसमुदायाः च नानाविधान् सांस्कृतिककार्यक्रमान् आयोजयन्ति । सबरीमाला-गुरुवायूर-त्रिक्कक्करादि प्रमुखमन्दिरेषु अद्य विशेषपूजाः सम्पद्यन्ते।

## राष्ट्रपति: द्रौपदी मुर्मू: ओणम

राष्ट्रपति: द्रौपदी मुर्मू: ओणम उत्सवावसरे सर्वेभ्यः विशेषतया केरलजनानां प्रति शुभाकामना: अयच्छत्। । स्वसन्देशे सा अवदत् यत् ओणं केरलस्य समृद्धसांस्कृतिकपरम्परायाः उदाहरणमस्ति ।

## प्रधानमन्त्री- वस्तुसव्ािकरस्य

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् तस्य सरकारेण वस्तुसेवाकरस्य (GST) क्षेत्रे नूतन-संशोधनानि विहितानि। । ह्य:सायं दिल्ल्यां राष्ट्रियपुरस्कारविजेतृभिः शिक्षकैः सह संवादे सः उक्तवान् यत् GST 2.0 राष्ट्राय द्विगुणं साहाय्यं विकासं प्रयच्छति, इदानीं वस्तुसेवाकरः अतिशयेन सुलभ: अभवत्।

श्री मोदी अब्रवीत् यत् मध्यमवर्गः, नवमध्यमवर्गः, निर्धनाः , युवावर्गः, नारीणां च समुदायः एभ्यः संशोधनेभ्यः लाभं प्राप्स्यन्ति। प्रधानमन्त्री अवोचत् यत् समयोचितपरिवर्तनं विना वैश्विकपरिस्थितौ भारतं स्वसमीचीनं स्थानं प्राप्तुं न शक्नोति।

**प्रधानमंत्री - सिङ्गापुर**

प्रधानमंत्री नरेन्द्र मोदी सिङ्गापुरस्य प्रधानमन्त्रिणा लारेन्स वोङ्ग इत्यनेन सह वार्तां कृतवान्, भारतस्य सिङ्गापुरस्य च मध्ये पञ्च संधिपत्राणि हस्ताक्षरितानि।

**ऋतु:**

भारतीय ऋतुविज्ञान विभागेन उद्घोषितं यत् आगामिषु दिवसेषु गुजरातस्य कतिपयस्थलेषु अति वृष्टिः भविष्यति।

महाराष्ट्रे, मध्यप्रदेशे, राजस्थाने, सौराष्ट्रे, कच्छे, कोङ्कणगोवायां च अद्यारभ्य प्रबलातिप्रबलवृष्टिः भविष्यति।

एवमेव दिल्ल्यां, हरियाणायाम्, चण्डीगढे, पश्चिमबङ्गे, उत्तराखण्डे, उत्तरपूर्वप्रदेशेषु च एतादृशी एव स्थिति: भविष्यति। जम्मू-कश्मीरे स्थानीय ऋतु विभागेन ऋतु विषये पूर्वानुमानां कृतम् तेन प्रकटयता प्रोक्तं यत् सामान्यत: मेघाच्छादनं भविष्यति। केषुचित् स्थानेषु मन्दात् मध्यमा वृष्टि: गर्जनेन सह बिन्दु: पतिष्यति।

**।। इति वार्ता:।।**